**फलेन्द्र** पु० फलेन इन्द्र ऐश्वर्य्यान्वितः। राजजम्बूवृक्षे। "फलेन्द्रा कथितानन्दा राजजम्बूर्महाफला" भावप्र०।

**फलेपुष्पा** स्त्री फले फलसुखे पुष्पमस्याः। द्रोणपुष्पीवृक्षे भावप्र०

**फलेरुहा** स्त्री फले तन्निमित्तं रोहति रुह–क। पाटलिवृक्षे अमरः।

**फलोत्तमा** स्त्री फलेन उत्तमा। १द्राक्षाभेदे राजनि०। २त्रिफलायां वैद्यक प्र०। [हृत०। ३फलस्योत्पत्तौ स्त्री।

**फलोत्पत्ति** पु० फलाय उत्पत्तिरस्य। १आम्रवृक्षे शब्दच०।

**फलेच्छुक** पु० १यक्षभेदे भा० स० १०अ०। २फलकामे त्रि०।

**फलोदय** पु० ६त०। १फलोत्पत्तौ २लाभे ३स्वर्गे ४हर्षे च शब्दर०

**फल्क** पु० फल–क नेत्त्वम्। विशोधिताङ्गे उज्ज्वलद०।

**फल्गु** त्रि० फल–उ गुक् च। १रम्ये मेदि० २असारे अमरः। ३निरर्थके त्रिका० ४मिथ्यावाक्ये शब्दर० ५गयातीर्थस्थनद्यां स्त्री। मेदि० (फागु) इति ख्याते धूलिरूपे ६पदार्थे ७वसन्तसमये, जटा०। ८काकोडुम्बरिकायाम् अमरः। फल्गुतीर्थमाहात्म्यं यथा "फल्गुतीर्थं व्रजेत् तस्मात् सर्वतीर्थोत्तमोत्तमम्। मुक्तिर्भवति पितृणां कर्तॄणां श्राद्धतः सदा। ब्रह्मणा प्रार्थितो विष्णुः फल्गुको ह्यभवत् पुरा। दक्षिणाग्निहुतं न्यून तद्रजः फल्गुतीर्थकम्। तीर्थानि यानि सर्वाणि भुवनेष्वखिलेष्वपि। तानि स्नातं समायान्ति फल्गुतीर्थं सुरैः सह। गङ्गापादोदकं विष्णोः फल्गुर्ह्यादिगदाधरः। स्वयं हि द्रवरूपेण तस्माद्गङ्गाधिकं विदुः। अश्वमेधसहस्राणां सहस्रं यः समाचरेत्। नासौ तत्फलमाप्नोति फल्गुतीर्थे यदाप्नुयात्" वायुपु० गयामा०।

**फल्गुदा** स्त्री फल्गुनद्यां "तत्र देशे गया नाम पुण्यदेशोऽस्ति पावनः। नदी च फल्गुदा नाम पितृणां स्वर्गदायिनी" वृहद्धर्म पु०। [मासि २अर्जुने च भरतः।

**फल्गुन** पु० फल्गुसूर्यभेदो नीयतेऽस्मिन् नी–ड। १फाल्गुने

**फल्गुनी** स्त्री फल–उनन् गुक् च गौरा० ङीष्। १काकोडुम्बरिकायाम् राजनि०। अश्विन्यवधिके एकादशे द्वादशे च २नक्षत्रे च ब०व० भरतः।

**फल्गुलुका** वायुकोणस्थे देशभेदे वृ०सं० १४अ०।

**फल्गुवाटिका** स्त्री फल्गूनां वाटीव इवार्थे कन्। काकोडुम्बरिकायाम् राजनि०।

**फल्गुवृन्ताक** पु० फल्गुना रम्येण वृन्तेन आकायति आ+कै–क। श्योनाकभेदे। राजनि०।

**फल्गूत्सव** पु० फल्गुनिमित्तक उत्सवः। फाल्गुनपौर्णमास्यादिषु कर्त्तव्ये (आवीर)फल्गुद्रव्यकरणे उत्सवे "गोविन्दानुग्रहीतन्तु यात्राङ्गं तत्प्रकीर्त्तितम्। फल्गूत्सवं प्रकुर्वीत पञ्चाहानि त्र्यहाणि वा" दोलयात्रापद्धतिः।

**फल्य** न० फलाय हितं यत्। पुष्पे शब्दच०।

**फल्लकिन्** पु० फलक+पृषो० तदाकारोऽस्त्यस्य इनि। (फलुइ) मत्स्यभेदे शब्दार्थकल्प०।

**फल्लफल** पु० शूर्पवाते जटाधरः।

**फा** पु० फल–बा० डा। १निष्फलभाषणे शब्दर०। २सन्तापे ३वृद्धौ ४वर्द्धके च विश्वः। [उपधातुभेदे राजनि०।

**फाटकी** स्त्री स्फुट ण्वुल् पृषो० गौरा० ङीष्। (फट्किरी)

**फाणि** स्त्री स्फाय–नि पृषो०। १गुडविकारे, २करम्भे (दधिमिश्रितसक्तौ) च उणादिकोषः।

**फाणित** न० फण–णिच्–क्त। गुडविकारभेदे (फेणी) अमरः "इक्षोः रसस्तु य पक्वः किञ्चिद्गाढो बहुद्रवः। स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया" भावप्र०। "फाणितं गुर्वभिष्यन्दि वृंहणं कफशुक्रकृत्। वातपित्तश्रमहरं मूत्रवस्तिविशोधनम्" तद्गुणास्तत्रोक्ताः।

**फाण्ट** न० फण–क्त नि०। १अनायासेन कृते अमरः। "क्षिप्रोष्णतोये मृदितः फाण्ट इत्यभिधीयते" इत्युक्ते २क्वाथभेदे पु०। "क्षुण्णद्रव्यपले सम्यक् जलमुष्णं विनिःक्षिपेत्। पात्रे चतुःपलमितं ततस्तु स्रावयेज्जलम्। सोऽयं चूर्णद्रवः फाण्टः भिषग्भिरभिधीयते" वैद्यक०।

**फाल** न० फलाय शस्याय हितम् अण्, फल्यते विदार्य्यते भूमिरनेन वा घञ्। १खनामख्याते लाङ्गलमुखस्थे लौहभेदे अमरः। फालमस्त्यस्य अच्। २बलदेवे ३महादेवे च पु०। फलस्य विकारः अण्। ४कार्पासवस्त्रे मेदि०। ५तप्तफालकरणपरीक्षाभेदे न०। फलेषु भवः अण्। ६जम्बीरबीजे पु० कुलचन्द्र। फालदिव्यप्रकारश्च दिव्यत०उक्तो यथा "वृहस्पतिः "आयसं द्वादशपलघटितं फालमुच्यते। अष्टाङ्गुलं भवेद्दीर्घं चतुरङ्गुलविस्तरम्। अग्निवर्णं ततश्चौरो जिह्वया लेहयेत् सकृत्। न दग्धश्चेच्छुद्धिमियादन्यथा स तु हीयते" चौरोऽत्र गोचौरः "गोचौरस्य प्रदातव्यं तप्तफाललेहनम्" इति स्मृतेरिति मैथिलाः। अत्रापि त्वमग्ने इत्यादिमन्त्रानन्तरम्। "आयसं लेलिहानस्य जिह्वयापि समादिशेत्" इति पितामहोक्तेः प्राड्विवाकशोध्याभ्यामभ्यभिमन्त्रणं कार्य्यम्। अत्र प्रयोगः लौकिकचत्वारिंशत्तोलकमितं लौहघटितमष्टयवमध्यात्मकाङ्गुलाष्टदीर्घम् तथाविध०